## २४ चतुर्विंश दशकः - महिषासुर वधम् - देवीस्तुतिः

देवि त्वया बाष्कल दुर्मुखादि दैत्येषु वीरेषु रणे हतेषु ।
सद्वाक्यत स्त्वा मनुनेतु कामः मोघप्रयत्नो महिषश्चुकोप ॥ २४-१॥

त्वां कामरूपः खुर पुच्छ शृङ्गैः नानास्त्र शस्त्रैश्च भृशं प्रहर्ता ।
गर्जन् विनिन्दन् प्रहसन् धरित्रीं प्रकम्पयंश्चा सुरराड्युयोध ॥ २४-२॥

जपारुणाक्षी मधुपान तुष्टा त्वं चारिणाऽरे र्महिषस्य कण्ठम् ।
छित्वा शिरो भूमितले निपात्य रणाङ्गणस्था विबुधैः स्तुताऽभूः ॥ २४-३॥

मातस्त्वया नो विपदो निरस्ता अशक्य मन्यै रिद मद्भुताङ्गि ।
ब्रह्माण्ड सर्ग स्थिति नाशकर्त्रीं कस्त्वां जयेत् केन कथं कुतो वा ॥ २४-४॥

विद्या स्वरूपाऽसि महेशि यस्मिन् स वै परेषां सुखदः कविश्च ।
त्वं वर्तसे यत्र सदाऽप्यविद्या - स्वरूपिणी स त्वधमः पशुः स्यात् ॥ २४-५॥

कृपाकटाक्षा स्तव देवि यस्मिन् पतन्ति तस्यात्मज वित्तदाराः ।
यच्छन्ति सौख्यं न पतन्ति यस्मिन् त एव दुःखं ददतेऽस्य नूनम् ॥ २४-६॥

पश्याम नित्यं तव रूपमेतत् कथाश्च नामानि च कीर्तयाम ।
नमाम मूर्ध्ना पदपङ्कजे ते स्मराम कारुण्य महाप्रवाहम् ॥ २४-७॥

त्वमेव माताऽसि दिवौकसां नो नान्या द्वितीया हितदानदक्षा ।
अन्ये सुता वा तव सन्ति नो वा न रक्षिता नस्त्वदृते महेशि ॥ २४-८॥

क्व त्वं वयं क्वेति विचिन्त्य सर्वं क्षमस्व नो देव्यपराध जालम् ।
यदा यदा नो विपदो भवन्ति तदा तदा पालय पालयास्मान् ॥ २४-९॥

इति स्तुवत्सु त्रिदशेषु सद्यः कृपाश्रुनेत्रैव तिरोदधाथ ।
ततो जगद्देवि विभूतिपूर्णं बभूव धर्मिष्ठ समस्त जीवम् ॥ २४-१०॥

त्वां संस्मरेयं न च वा स्मरेयं विपत्सु मा विस्मर मां विमूढम् ।
रुदन् बिडालार्भकवन्न किञ्चित् शक्नोमि कर्तुं शुभदे नमस्ते ॥ २४-११॥

** अयि गिरि नन्दिनि नन्दित मेदिनि विश्व विनोदिनि नन्दिनुते
गिरिवर विन्ध्य शिरोऽधि निवासिनि विष्णु विलासिनि जिष्णुनुते ।
भगवति हे शिति कण्ठ कुटुम्बिनि भूरि कुटुम्बिनि भूरिकृते
जय जय हे महिषासुर मर्दिनि रम्य कपर्दिनि शैलसुते ॥ **